# Shri Nimbarka Kavacham

# શ્રીનિમ્બાર્કકવચમ્

## Document Information

Text title : Nimbarka Kavacham

File name : nimbArkakavacham.itx

Category : deities_misc, gurudev, nimbArkAchArya, kavacha

Location : doc_deities_misc

Author : gauramkhAchArya

Proofread by : Chandrasekhar Karumuri

Acknowledge-Permission: Jagadguru Nimbarkacharyapitham, Shrinimbarkatirtha, Kishangadh, Ajmer, Rajasthan

Latest update : January 20, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 20, 2023

*sanskritdocuments.org*

# શ્રીનિમ્બાર્કકવચમ્

નિમ્બાર્ક-કવચં વક્ષ્યે મહર્ષિગણમધ્યતઃ ।
હવિર્દ્ધાનં નમસ્કૃત્ય ગૌરમુખ ઉવાચ હ ॥ ૧॥

નિમ્બાર્ક-કવચં વક્ષ્યે સમ્પદ્યેતે યશોજયૌ ।
સંકટે દુર્ગમે પ્રાપ્તે પ્રાણરક્ષાકરં નૃણામ્ ॥ ૨॥

નિમ્બાર્ક કવચસ્યાસ્ય સર્વાચાર્યાદ્વયસ્ય ચ ।
ઋષિગૌરમુખશ્ચ્ છન્દોઽનુષ્ટુપ્ નિમ્બાર્ક એવ તુ ॥ ૩॥

દેવઃ સુદર્શનો બીજં શક્તિઃ પુરાણમેવ ચ ।
વિતતં કીલકં ચૈવ પવિત્રં કવચં તથા ॥ ૪॥

ચક્ર મસ્ત્રં મનુસ્ત્વેવં ષડક્ષર ઉદાહૃતઃ ।
દ્વયનન્તરનરાકારમિતિ ધ્યાનં પ્રકીર્તિતમ્ ॥ ૫॥

નિમ્બાર્ક પ્રીત્યર્થે જપે વિનિયોગઃ સમીરિતઃ ।
ઇતિ સઙ્કલ્પ્ય ચર્ચ્યાદ્યાન્ શીર્ષાદિષુ ક્રમાન્ન્યસેત્ ॥ ૬॥

શીર્ષમાસ્યં ચ હૃદ્ ગુહ્યં પાદૌ સર્વાઙ્ગ-દિક્ષુ ચ ।
હાર્દે બાહ્યાભ્યન્તરયોશ્ચતુર્થ્યા ચ નમોઽન્તકાઃ ॥ ૭॥

“નમો નિમ્બાર્કાય” ઇતિ મન્ત્રં ષડક્ષરં વિદુઃ ।
અઙ્ગુલી-તલ-પૃષ્ઠેષુ ઙે-દ્વિવચ-નમોઽન્તિષુ ॥ ૮॥

ક્રમાન્ન્યસેદેકૈકશો દ્વિતીયાન્તાન્ ષડક્ષરાન્ ।
નમ આદ્યન્તેષ્વંગેષુ દ્વિતીયાન્તાન્ ષડક્ષરાન્ ॥ ૯॥

હૃદયે શિરસિ શિખા–કવચેઽક્ષિત્રયેઽસ્ત્રતઃ ।
નમઃ સ્વાહા વષટ્ હું વૌષટ્ ફડેતાન્ પદાન્ન્યસેત્ ॥ ૧૦॥

વિનિયોગઃ-
ૐ અસ્ય શ્રીનિમ્બાર્ક સર્વાચાર્યકવચસ્ય

શ્રીગૌરમુખ ઋષિઃ, અનુષ્ટુપ્ છન્દઃ, શ્રી નિમ્બાર્કો દેવતા,
સુદર્શનો બીજમ્, પુરાણં શક્તિઃ, વિતતં કીલકમ્, પવિત્રં કવચમ્,
ચક્રમસ્ત્રમ્, ષડક્ષરઃ પરમો મન્ત્રઃ, દ્વ્યનન્તર નરાકારમિતિ ધ્યાનમ્,
સર્વાચાર્યપ્રીત્યર્થે જપે વિનિયોગઃ ।
ઋષ્યાદિ ન્યાસાઃ-
શ્રી ગૌરમુખાય ઋષયે નમઃ શિરસિઃ ।
અનુષ્ટુપ્ છન્દસે નમો મુખે ।
શ્રીનિમ્બાર્કાય દેવાય નમો હૃદિ ।
સુદર્શનાય બીજાય નમો ગુહ્યે ।
પુરાણશક્તયે નમઃ પાદયોઃ ।
વિતતાય કીલકાય નમઃ સર્વાઙ્ગે ।
પવિત્રાય કવચાય નમઃ સન્ધિષુ ।
ચક્રાય અસ્ત્રાય નમો દિક્ષુ ।
ષડક્ષરાય પરમાય મન્ત્રાય નમો હૃદિ ।
દ્વ્યનન્તરનરાય ધ્યાનાય નમો બાહ્યાભ્યન્તરયોઃ ।
શ્રીનિમ્બાર્કસર્વાચાર્યપ્રીત્યર્થે જપે વિનિયોગાય નમઃ કરાઞ્જલૌ ।
કરન્યાસાઃ-
નં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
મોં તર્જનીભ્યાં નમઃ ।
નિં મધ્યમાભ્યાં નમઃ ।
બાં અનામિકાભ્યાં નમઃ ।
ર્કાં કનિષ્ઠિકાભ્યાં નમઃ ।
યં કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
હૃદયાદિ ન્યાસાઃ-
નં હૃદયાય નમઃ ।
મોં શિરસે સ્વાહા ।
નિં શિખાયૈ વષટ્ ।
બાં કવચાય હુમ્ ।
ર્કાં નેત્રત્રયાય વૌષટ્ ।
યં અસ્ત્રાય ફટ્ ।
('નમો નિમ્બાર્કાય' ઇતિ ષડક્ષર મન્ત્રઃ )
ધ્યાનમ્-

ધ્યાત્વા કાલાઙ્ગ-સમ્પન્નં દ્વાદશારશિરોઽન્વિતમ્ ।
ચાતુર્માસ્ય-વલયં તુ ષટ્કોણ-શોભિતં તથા ॥ ૧૧॥

અયનદ્વય-નિર્માણ દ્વયમન્યન્નરાકૃતિમ્ ।
સ્વસ્તિકાસનમધ્યસ્થમરુણાભં સિતાંશુકમ્ ॥ ૧૨॥

સવ્યહસ્તતલે જાનું તત્ત્વમુદ્રોપશોભિતં
આયતાક્ષં મહાભાલમૂર્ધ્વપુણ્ડ્રસુરોચિષમ્ ॥ ૧૩॥

તુલસીમાલયાયુક્તમાચાર્યં મુખ્યમીશ્વરમ્ ।
કેશવલ્લીસમાવિષ્ટં સમ્યક્ચૂડિતમૂર્ધજમ્ ॥ ૧૪॥

જપેન્નિત્યં ભયાસન્ને દેશે કાલે રુગાગમે ।
નિમ્બાર્કનામનિર્માણમિદં વર્માઽઽશુ સિદ્ધિદમ્ ॥ ૧૫॥

કવચમ્–
સુદર્શનસ્તમોધ્વંસી વાતપત્રં શિરોદ્ધતમ્ ।
સુસ્થિરં ધ્યાયતે શમ્ભુઃ ભ્રુવૌ મે કાલવિગ્રહઃ ॥ ૧૬॥

નિમ્બાદિત્યોઽવતાન્નેત્રે રાધાકૃષ્ણ ઉરોજસમ્ ।
રાધા-કૃષ્ણ-રસાભાસી કપોલૌ મે કવીશ્વરઃ ॥ ૧૭॥

દન્તાન્ ચક્રાકૃતિઃ પાતુ હવિર્દ્ધાનશ્ચ જિહ્વિકામ્ ।
ઓષ્ઠં પાતુ નિમાનન્દશ્ચિબુકં ચક્રમધ્યગઃ ॥ ૧૮॥

મુખં નિમ્બરવિઃ પાતુ નક્તન્યાસનભોજકઃ ।
કણ્ઠે વૈકુણ્ઠહસ્તશ્ચ પાતુ દુષ્ટવિખણ્ડનઃ ॥ ૧૯॥

વક્ષસ્થલં સદા પાતુ નિમ્બો મે ભક્તવત્સલઃ ।
નિમ્બાનન્દો ભુજૌ પાતુ તરદદ્રિસ્વરૂપધૃક્ ॥ ૨૦॥

કરાવરી સદા પાતુ ચાઙ્ગુલીર્દ્વાદશારકઃ ।
તેજોમયઃ સદા પાતુ દરં મે દુર્જરૌઘપાક્ ॥ ૨૧॥

દ્વયનાન્તર્નરાકારો નાભિં મમ સદાઽવતુ ।
સત્પરીક્ષ એવ વર્તિ યષ્ટિં મેઽઙ્ગં સદાઽવતુ ॥ ૨૨॥

આશુવેગો ભ્રમન્નેમિઃ પાતુ મે કટિમણ્ડલે ।
નેમિ-નિજો જઘનં મે પાતુ ઋષિ-મુનીશ્વરઃ ॥ ૨૩॥

જાનુની વિષ્ણુદૂતો મે જઙ્ઘે વિશ્વસ્વરૂપધૃક્ ।

ચરણૌ પાતુ ચક્રં મે વ્રજમણ્ડલ-ભારભૃત્ ॥ ૨૪॥

ગુલ્ફૌ મે નિયમાનન્દઃ પાર્ષ્ણિં ચૈવ શ્વલાપયેત્ । (શ્વલાપયેત્ શ્વલ આશુગમને ।)
આચાર્ય પ્રપદે પાતુ વિતતં પાતુ ભૂતલે ॥ ૨૫॥

પૂર્વસ્ય દિશિ માં રક્ષેત્ પ્રિયા શ્રીલલિતાસખી ।
પશુહિંસાનિવૃત્તિર્મામાગ્નેય્યાં દિશિ રક્ષતુ ॥ ૨૬॥

દક્ષિણે ચમ્પકલતા ચિત્રા નૈરૃત્યકેઽવતુ ।
તાપસંસ્કારનિર્ણેતા વારુણ્યાં દિશિ રક્ષતુ ॥ ૨૭॥

પાદાગ્રસરિદોઘસ્તુ વાયવ્યાં દિશિ રક્ષતુ ।
ગૌરમુખમુખાવર્તિર્મા મુદઙ્ગ દિશિ રક્ષતુ ॥ ૨૮॥

બ્રહ્મપુત્રજનોદ્ધર્ત્તા ઐશાન્યાં દિશિ રક્ષતુ ।
રવીન્દુશત્રુસંવાસી હ્યૂર્ધ્વાયાં દિશિ પાતુ મામ્ ॥ ૨૯॥

અધસ્તાદ્ દિશિ માં પાતુ શેષપર્યન્તરન્ધ્રજિત્ ।
કાલાત્મકો દિવા પાતુ નક્તં સૂર્યસ્વરૂપધૃક્ ॥ ૩૦॥

પ્રભાતે ત્વરુણઃ પાતુ મધ્યાહ્ને પાતુ ચારુણિઃ ।
સન્ધ્યાયામારુણિઃ પાતુ નિશીથે સ્વપ્રકાશવાન્ ॥ ૩૧॥

ભક્તિદો હૃદયં પાતુ ચતુષ્કં ચતુરક્રિયઃ ।
બુદ્ધિં બ્રહ્માર્થિતઃ પાતુ ચિત્તં વિષ્ણુ-પ્રયોજિતઃ ॥ ૩૨॥

અનિરુદ્ધાનુવર્તી મે પાતુ સ્વસ્ત્યયકં મનઃ ।
મોહ-ગ્રાહ-ક્રિયઃ પાતુ સર્વચિત્તેન્દ્રિયાણિ મે ॥ ૩૩॥

દુર્બુદ્ધેર્મે સદા પાતુ દુર્જન-દમનો ધ્રુવઃ ।
તાપાત્મકઃ સદા પાતુ મહાપાતકસંચયાત્ ॥ ૩૪॥

કામદેવ-મહાવેગાન્નૈષ્ઠિકો બ્રહ્મચર્યવાન્ ।
પાતુ માં સર્વદા ધીરઃ સદાચાર-પરાયણઃ ॥ ૩૫॥

સહિષ્ણુર્માં સદા પાતુ દૃઢાત્ ક્રોધૌઘરંહસઃ ।
પુરુષાર્થદો માં પાતુ મહાલોભૌઘરંહસઃ ॥ ૩૬॥

વિજ્ઞાનાસારવર્ષી માં મહામોહૌઘવેગતઃ ।
રક્ષતુ માં ભયાન્ નિત્યં નિર્ભયશ્ચક્રબાલધૃક્ ॥ ૩૭॥

પાષણ્ડ-ષણ્ડ-દહનઃ પાતુ પાષણ્ડકર્મણઃ ।
ચરણં મે સ્થલે પાતુ કૃષ્ણચરણ-સંજ્ઞકઃ ॥ ૩૮॥

સલિલે માં સદા પાતુ મજ્જજ્જનૈક-પારદઃ ।
અગ્નેસ્તેજસ્તેન પાતુ વાયૌ ખેચરપાલકઃ ॥ ૩૯॥

આકાશે વેગવાન્ પાતુ ગ્રહેભ્યઃ કાલવિગ્રહઃ ।
અરણ્યે માં સદા પાતુ વૃન્દારણ્ય-નિવાસકૃત્ ॥ ૪૦॥

પર્વતે માં સદા પાતુ ગોવર્દ્ધનતટે સ્થિતઃ ।
દુર્ગમે સંકટે પાતુ દુર્ગ-સંકટ-ભેદકઃ ॥ ૪૧॥

સાભિલાષઃ સદા પાતુ શર્વરીશ્વરશીતલઃ । (સામ શિશામયુર્જિતઃ ।)
જયન્તીનન્દનઃ શ્રીમાન્ વિપ્રાશા-પરિપૂરકઃ ॥ ૪૨॥

પ્રસહ્યે માં સદા પાતુ પ્રપન્ન ભયભઞ્જનઃ ।
કૃષ્ણતન્ત્રચરઃ શશ્વત્ માં સદા પાતુ સર્વતઃ ॥ ૪૩॥

નિજનામાસ્ત્રકઃ પાતુ સર્વત્ર માં હિ સર્વગઃ ।
રાધાકૃષ્ણ-પ્રિયા પાતુ રઙ્ગદેવી સખીશ્વરી ॥ ૪૪॥

રાધાકૃષ્ણપદ-પ્રાપ્તૌ વિઘ્નાન્માં વિઘ્નનાશિની ।
નિમ્બાદિત્ય ! મહાબાહો ! સર્વપાલ ! સુદર્શન ! ॥ ૪૫॥

આદ્યાચાર્ય રઙ્ગદેવી ત્વમેવ શરણં મમ ।
પ્રેમદં ભક્તિદં રમ્યં ભુક્તિ-મુક્તિ-પ્રદં સદા ॥ ૪૬॥

માલામન્ત્રમિદં પ્રોક્તં નિમ્બાદિત્યસ્ય વેધસઃ ।
ૐ નિમ્બાર્ક ઙેન્તમુચ્ચાર્ય વિદ્મહે પદમાચરેત્ ॥ ૪૭॥

આદ્યાચાર્ય તુરીયાન્તં ધીમહીતિપદં તતઃ ।
તન્નશ્ચક્ર મિતિ કૃત્વા બ્રૂયાત્પ્રચોદયાદિતિ ॥ ૪૮॥

શ્રીનિમ્બાર્ક ગાયત્રી–
ૐ નિમ્બાર્કાય વિદ્મહે આદ્યાચાર્યાય ધીમહિ તન્નશ્ચક્રં પ્રચોદયાત્ ।
ફલસ્તુતિઃ-
ઇદં ચક્રાહ્વસમ્પન્નં નિમ્બાર્ક કવચં શુભમ્ ।
પ્રેમભક્તિકરં રમ્યં યુગ્મમન્ત્રૌઘવિગ્રહમ્ ॥૪૯॥

સર્વ-વિઘ્ન-હરં શુદ્ધં બોધદં બુદ્ધિરક્ષકમ્।

ભુક્તિ-મુક્તિકરં દિવ્યં ધન-ધન્ય-પ્રદં પરમ્ ॥૫૦॥

જ્ઞાનદં માનદં શ્રેષ્ઠં મહાસૂત્ર-યશસ્કરમ્ ।
તુષ્ટિદં પુષ્ટિદં રમ્યં દુષ્ટસ્ય નાશનં ધ્રુવમ્ ॥ ૫૧॥

અભિલાષભરં તીવ્ર-ક્રોધ-મોહ-સ્મરાપહમ્ ।
દુર્ગમે સંકટે ઘોરે રાજસ્થાને ભયાવહે ॥ ૫૨॥

સંગ્રામેઽસ્ત્રસમૂહાગ્રે સિંહ-વ્યાઘ્રભયે તથા ।
શ્મશાને ચ ભયેસ્થાને પર્વતેઽગ્નૌ જલે સ્થલે ॥ ૫૩॥

ચૌર-સર્પ-ભયેઽત્યુગ્રે ભૂત-પ્રેત-પિશાચગે ।
બ્રહ્મરાક્ષસ-વેતાલ-કૂષ્માણ્ડે ભૈરવે ગ્રહે ॥ ૫૪॥

આસન્ને સંપઠેન્નિત્યં મુચ્યતે સર્વતો ભયાત્ ।
નિમ્બાર્ક-કવચં પદ્મં વિકટે શત્રુ-સંકટે ॥ ૫૫॥

ગુરુમભ્યર્ચ્ય મનસા વિધિવદ્ધર્મ સંપઠેત્ ।
શ્રીનિમ્બાદિત્યભક્તાય સ્વૈતિહ્ય-તત્પરાય ચ ॥ ૫૬॥

ગુરુભક્તિ-પ્રસિદ્ધ્યર્થં શ્રીયુગ્મોપાસકાય ચ ।
પઞ્ચસંસ્કાર-યુક્તાય વિનીતાય યશસ્વિને ॥ ૫૭॥

ઇદં રમ્યં મહાશુદ્ધં દાતવ્યં કવચં બુધૈઃ ।
દુર્વિનીતાયાઽભક્તાય ગુરુવિમુખ-માર્ગિણે ॥ ૫૮॥

સમ્પ્રદાય-વિહીનાય દત્ત્વા મૃત્યુમવાપ્નુયાત્ ।
મન્ત્રૌઘા નૈવ સિદ્ધ્યન્તિ નિમ્બાર્ક-કવચં બિના ॥ ૫૯॥

ઇદં સત્યમિદં સત્યં સત્યં સત્યં વદામ્યહમ્ ।
નિમ્બાર્ક-કવચં પાઠ્યં સર્વમન્ત્રાર્થ-સિદ્ધ્યે ॥ ૬૦॥

સર્વસિદ્ધિમવાપ્નોતિ શ્રીનિમ્બાર્ક પ્રસાદતઃ ।
જીવન્મુક્તો ભવેત્ સોઽપિ વિષ્ણુરેવ ન સંશયઃ ॥ ૬૧॥

ઇતિ શ્રીગૌરમુખાચાર્યવિનિર્મિતં સિદ્ધિદં શ્રીનિમ્બાર્કકવચં સમ્પૂર્ણમ્ ।

Proofread by Chandrasekhar Karumuri

*Shri Nimbarka Kavacham*

pdf was typeset on January 20, 2023

Please send corrections to *sanskrit@cheerful.com*